**दिनाङ्क:- 15.06.2024**
**प्रात:- 06:55**

## अथवार्ता:

### प्रधानमन्त्री जी 7

प्रधानमन्त्री नरेन्द्रमोदी ह्यः वैश्विकदक्षिणस्य विशिष्टतया आफ्रिकादेशस्य समाह्वानानां प्राथमिकताम् अददात् इति आह्वानं कृतवान्। इटलीदेशस्य अपुलियायां जी-सप्त शिखरसम्मेलने आउटरीच-सत्रं सम्बोधयन् श्रीमोदी स्मरणं कृतवान् यत् आफ्रिका देशः भारतस्य अध्यक्षत्वे जी-विंशतिः-सङ्घस्य स्थायीसदस्यत्वेन प्रविष्ट्वान अतः भारतस्य कृते गौरवस्य विषयः वर्तते | श्रीमोदिना भारतस्य ऊर्जासंक्रमणमार्गस्य विषये विस्तरेण उक्तं यत् तस्य दृष्टिकोणः उपलब्धता, सुलभता,सामर्थ्य, स्वीकार्यता च आधारितास्ति। सः उल्लेखितवान् यत् भारतं सप्तत्यधिक द्विसहस्र तमवर्षपर्यन्तं NET ZERO इति लक्ष्यं प्राप्तुं कार्यं कुर्वन् अस्ति।भारतस्य Mission LiFE इत्यस्य संकेतं कृत्वा सः वैश्विकसमुदायस्य आह्वानं कृतवान् यत् ते विश्वपर्यावरणदिवसस्य अवसरे तेन समारब्धस्य आंदोलने "Plant4Mother" [ Ek Pedh Maa Ke नाम] इत्यस्मिन् भागं स्वीकुर्वन्तु। प्रधानमन्त्री नरेन्द्रमोदी ह्य: इटलीदेशस्य अपूलियानगरे समायोक्ष्यमाणे जी-सप्त शिखर-सम्मेलने भागं ग्रहणाय सम्प्राप्तवान् । असौ इटलीदेशस्य प्रधानमन्त्रिण: जार्जिया-मेलोनी-इत्यस्या: निमन्त्रणे द्विवसीययात्रायां वर्तते । तृतीये कार्यकाले तस्य प्रथम विदेश यात्रा जी-सप्त शिखरसम्मेलनाय वर्तते।

### प्रधानमन्त्री इटली

इटलीदेशस्य अपुलियायां ह्यः जी सप्त शिखरसम्मेलनावधौ प्रधानमन्त्री नरेन्द्रमोदी इटलीदेशस्य प्रधानमन्त्रिणा जियोर्जिया मेलोनी इत्यनया सह द्विपक्षीयोपवेशनं कृतवान्। उभौ नेतारौ द्विपक्षीय-रक्षा-सुरक्षा-सहकार्यविषये चर्चां कृत्वा रक्षा औद्योगिकसहकार्यं अधिकं वर्धयिष्यति इति आशा प्रकटितवन्तौ। तौ भारत- इटली सामरिकसहभागस्य प्रगतेः समीक्षां कृतवन्तौ ।

### शाह: जम्मू कश्मीर

केन्द्रीय गृहमन्त्री अमितशाहः ह्यः नवदिल्ल्यां मन्त्रालयस्य वरिष्ठाधिकारिभिः सह उपवेशनं कृत्वा जम्मू-कश्मीरस्य सुरक्षास्थितेः समीक्षां कृतवान्। श्रीशाहेन केन्द्रशासिते क्षेत्रे सुरक्षास्थितेः समीक्षायै अमरनाथयात्रायाः सज्जतायै च रविवासरे नोर्थ ब्लॉक इत्यत्र उपवेशनस्य आयोजनस्य निर्देशः प्रदत्तः।

### सिक्किम

सिक्किमराज्ये अधिकारिणः पुष्टिं कृतवन्तः यत् उत्तरसिक्किमस्य लाचुङ्गनगरे मार्गावरोधकारणात् अटन्तः द्वादशशतं देशियाः तथा पञ्चदश विदेशीयाः पर्यटकाः पर्याप्तभोजनसामग्रीभिः सह सुरक्षिताः सन्ति। निष्कासन प्रक्रियासु विमानं मार्गनिष्कासनं वा अन्तर्भवति । मुख्यमन्त्री प्रेमसिंह तामाङ्गः मिन्टोकगङ्ग गङ्गटोक् इत्यत्र उच्चस्तरीय उपवेशनं कृत्वा स्थितेः समीक्षा कृतवान् ।

तीस्ता नद्या: जलस्तरस्य वर्धनेन संकलंग-क्षेत्रे पुरातन: लटकनसेतु: नवनिर्मित: बेली-सेतु: च जले पतितौ। येन उत्तर-सिक्किम-राजस्य जोन्धु-प्रदेशेन सह महत्वूर्ण: सम्पर्क: खण्डित:। मंगल-जनपदे अधिकारिणा हेम-कुमार-छेत्री इत्यनेन वृष्टया कारणात् जातस्य क्षते: आकलनं कृतम्।

**टी-20 क्रिकेट विश्व कप**

आई.सी.सी. इत्यस्यां पुरूषाणां विंशति प्रति विंशति-विश्व-चषक-क्रिकेट्-प्रतिस्पर्धायां अफगानिस्तानदलेन पापुआ-न्यू-गिनीदलं त्रिनिदाद इत्यत्र ब्रायन लारा क्रीडांगणे सप्तस्तोभैः पराजितम्।

**॥ इति वार्ताः॥**